# ॥ पञ्च देवता पूजा ॥

.. Worship of Five Deities ..

sanskritdocuments.org

August 20, 2017

# .. Worship of Five Deities ..

# ॥ पञ्च देवता पूजा ॥

## Sanskrit Document Information

Text title : pancha devataa puujaa Worship of Five Deities

File name : devataa5pujaa.itx

Category : panchaka, deities_misc

Location : doc_deities_misc

Language : Sanskrit

Subject : hinduism/religion

Transliterated by : Daniel Mohanpersad

Proofread by : Daniel Mohanpersad

Translated by : -

Description-comments : source : brahmavaivarta puraaNa

Latest update : November 1 , 2002

Send corrections to : danielmohanpersad98@msn.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ पञ्च देवता पूजा ॥

॥ श्रीगणेशाय नमः ॥

॥ अथ पञ्च देवता-पूजन-विधि ॥

स्नातः श्वेतवस्त्रपरिधानं कृत्वा कुशहस्तो यजमानः

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥

ॐ यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि ॥

इति मंत्रेण यज्ञोपवीतधारणं कृत्वा आसनो परि
उपविष्टः चन्दन-लेपनं कुर्यात्।

तिलकं चन्दनस्याथ पवित्रं पापनाशनं ।
यः कुर्यात् प्रत्यहं स्नात्वा लक्ष्मीर्वसति तद्गृहे ॥

ततः–
ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

इति जलेन् आत्मानं पुजोपकरणानि च अभिषिञ्चेत् ।

ॐ पृत्वी त्वया धृता लोका देवी त्वं विष्णुना धृता ।
त्वञ्च धारय मां देवि पवित्रं कुरु चासनम् ॥

इति प्रणम्य त्रिकोणमण्डलं विधाय जलगन्धाक्षतपुष्पै ।

ॐ पृथिव्यै नमः। ॐ आधारशक्तये नमः। ॐ कुर्माय
नमः। ॐ अनन्ताय नमः। ॐ शेषनागाय नमः।

सम्पूज्य।

ततः श्वेतसर्षपानादाय
ॐ गंगे च यमुने चैव गोदावरि सरस्वती।
नर्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधि कुरु॥

इत्यधोपोपात्रे गङ्गादितिर्थान्याहूय।

ॐ गंगादिसरिद्भ्यो नमः ।

इति गन्धाक्षतपुष्पैः सम्पूज्यबद्धाञ्जलिर्भूत्वा प्रार्थयेत् ।

ॐ सूर्य्यस्सोमो यमः कालः सन्ध्ये भूतान्यहः क्षमा ।
पवनो दिक्पतिर्भूमि राका शंखश्चरामराः।
ब्रह्मेशासनमास्थाय कल्प्यध्वमिह सन्निधिम् ।
तद्विष्णोः परमं धाम सदा पश्यन्ति सूरयः ॥

ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणोह्नि द्वितियपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणो भारतवर्षे भरतखण्डे शालिवाहनशके बौधावतारे अमुकसंवत्सरे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकगोत्रोऽहं अमुकशर्माऽहं अमुकप्रधानदेवार्चनद्वारा मम सपरिवारस्य सकुटुम्बस्य सकलदुरितोपशमनार्थं सर्वापदां शान्त्यर्थं विपुलधनधान्य सुखसौभाग्यादि-निखिलसदभिष्ट-संसिद्धये च अमुक प्रधान देवता पूजनं ब्राह्मणवरणं स्वस्त्याहवाचनं कलशस्थानं गणेशादि पञ्चदेवतानवग्रह-दिक्पालादि-सर्वदेवैर्देवोभिश्च सह अमुकप्राधान देवतापूजनं करिष्ये ॥

इति संकल्पः

ततः स्वस्त्ययनम्
ॐ स्वस्ति नऽ इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः
स्वस्तिनस्ताक्ष्योंऽरिष्टनेमिःस्वस्तिनो बृहस्पतिर्दधातु ॥

ॐ पृश्निमातरः शुभंयावानो विदथेषु जग्मयः
अग्निर्जिह्वा मनवः सूरचक्षसो विश्वेनो देवाऽवसागमन्निह ॥

ॐ भद्रंकर्णेभि श्रृणुयाम देवा भद्रम्पश्येमाक्षभिर्यजत्राः
स्थिरैरंगैस्तुष्टुवां सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥

शतमिन्नु शरदो अन्ति देवा यात्रानश्चक्रा जरसन्तनूनाम्
पुत्रासो यत्र पितरो भवन्ति मानो मद्यारी रिषतायुर्गन्तोः ॥

आदितिर्द्यौरदिरन्तरिक्षमदितिर्माता सपिता सपुत्रः
विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमादितिर्जनित्वम् ॥

दीर्घायुत्वाय बलाय वर्चसे सुप्रजास्वाय सहसा अथो जीव
शरदश्शतम् ॐ द्यौः शान्तिरन्तरिक्ष् ँ शान्ति पृथिवी
शान्तिरापः शान्तोषधयः शान्तिः ।
वनस्पतयःशान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्ति सर्व ँ
शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥

मंगलं भगवान् विष्णुः मंगलं गरुडध्वजः ।
मंगलं पुण्डरीकाक्षः मंगलायतनो हरिः ।
ॐ यं ब्रह्म वेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथान्ये ।
विश्वसृतेः कारणमिश्वरं वा तस्मै नमो विघ्नविनाशनाय॥

ततः कलशसंस्थापनम् ।

ॐ भूरसि भूमिरस्य दितिरसि विश्वधायाविश्वश्य भुवनस्य धर्त्री।
पृथिवीयच्छ पृथिवीं दृठँह पृथिवीम् माहिठँसीः ॥

इति भूमिस्पर्शः।

ॐ मानस्तोके तनये मान आयुषिमानो गोषुमानो अश्वेषेरीरिषः
मानो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदामित्वाहवामहे ॥

इति गोमयस्पर्शः।

ॐ धान्यमसि धिनुहि देवान्प्राणयत्वोदानायत्वा
व्यानायत्वा दिर्घामनुप्रसिति मायुषे धान्देवो वः सविता
हिरण्यपाणिः प्रतिगृभ्ण त्वच्छिद्रेण पाणिना चक्षुषेत्वा
महीनां पयोसि॥

इति धान्य स्पर्शः।

ॐ आजिघ्रकलशं मह्यात्वाविशन्त्विन्दवः पुनरूर्जानिवर्त्तस्वसानः
सहस्त्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा विहतान्द्रयिः ॥

इति कलशस्पर्शः

ॐ वरुणस्योत्तम्भनमसि व्वरुणस्यकम्भ सर्जनीथो वरुणस्य ऋतसदन्यसि वरुणस्य
ऋत सदनमसि वरुणस्य ऋत सदनमसि वरुणस्य् ऋतसदनमासीत् ॥

ॐ याः फलिनीर्या अफला अपुष्पायाश्च पुष्पिणीः

बृहस्पतिप्रसूतास्तानो मुञ्चत्वꣳहसः ॥

इति फलं ।

ॐ काण्डात्काण्डात्प्ररोहन्ति परुषः परषस्परि एवानो दुर्वे प्रतनु सहस्रेण शतेन च ॥

इति दूर्वा

ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः
तस्यते पवित्रापते पवित्र पूतस्य यत्कामः पुनेतच्छकेयम् ॥

ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक।आसीत् सदाधार
पृथिवीं द्यामुते मां कस्मै देवाय हविषा व्विधेम॥

इति हिरण्यदक्षिणाम् ॥

ॐ अम्बेऽम्बिकेऽम्बालिकेऽनमानयतिकश्च नससस्त्यश्वकः सुभद्रिकाङ्काम्पिलवासिनीम् ॥

इत्याम्रादि पल्लवान्

ॐ पूर्णादवि परापत सुपुर्णा पुनरापत वस्नेव विक्रीणा वहा इषमूर्जं शतक्रतोः ॥

इति पूर्णपात्रम् पुर्णपात्राय धान्यमसि पठित्वा नारिकेलं श्रीश्चते पठित्वा ।

श्रीश्चते लक्ष्मीश्च पत्न्या बहो रात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्
इष्णन्निषाणामुम्म इषाणसर्वलोकम्म इषाण ॥

इति वस्त्रम्

ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा
अग्निवर्चो ज्योतिवर्चः स्वाहा सूर्योवर्चो ज्योतिवर्चः स्वाहा
ज्योतिः सूर्य्य सूर्यो ज्योतिः स्वाहा ॥

इति दीपम्

ॐ दधिक्क्राब्णोऽ अकारिषञ्जिष्णोरश्वस्य व्याजिनः ।
सुरभिनो मुखाकर्त्प्रण आयुँषितारिषत् ॥

इति सदधि जलम्

आकृष्णेति मंत्रेण वस्त्रसमर्पणम्

ॐ मनो जुतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टँ यज्ञं समिमन्दधातु।
विश्वेदेवा स इह मादयन्तामोम्प्रतिष्ठ ॥

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानान्तामिहोपह्वये श्रियम् ।

इति चन्दनम्

ततः कलशावाहनं पठेत्

सर्वे समुद्राः सरितस्तीर्थानि जलदानदाः।
आयांतुदेवपुजर्थं दुरितक्षयकारकाः
कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥

कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।
अंगैश्च सहिताः सर्वे कलशन्तु समाश्रिताः ॥

ॐ मनो जुतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टँ यज्ञं समिमन्दधातु।
विश्वेदेवा स इह मादयन्तामोम्प्रतिष्ठ ॥ इति॥

ततः कलश-पूजा ।

इदं पाद्यं इदं अर्घ्यं इदं स्नानीयं जलं ब्रह्मणे नमः ॥

अन्नपूर्णायै नमः ।
लक्ष्म्यै नमः ।
गायत्र्यै नमः ।
सर्वतीर्थेभ्यो नमः ।
सर्वक्षेत्रेभ्यो नमः ॥

एवमेव गन्धाक्षत-पुष्प कुंकुमादि द्रव्यैः सम्पूज्य
बद्धाञ्जलिः प्रार्थयेत् ।

कलशाधिष्ठातृदेवता पूजिताः प्रसन्नो भवत

सतः कलशपुरो भागे कस्मिंश्चित्पात्रे पञ्चदेवपूजामारभेत्
तत्रादौ पुष्पाञ्जलिं कृत्वा ध्यायेत्।

ॐ सर्वस्थूलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरं
प्रस्पन्दं मदगन्धलुब्धमधुपव्यालोलगण्डस्थलम् ।
दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरं
वन्दे शैलसुतासुतं गणपतिं सिधिप्रदं कामदं ।

ॐ भगवन् गणेश स्वगणसंयुत इहागच्छ इह
तिष्ठ एतां पूजां गृहाण् ।
इत्यावह्य इदं पाद्यं इदमर्घ्यं इदं स्नानीयमाचनियञ्च
जलं समर्पयामि।
ततः सायुधाय सवाहनाय सपरिवाराय ॐ भगवते गणेशाय नमः ।
इदं चन्दनमिदं सिन्दूरमेतानक्षतांश्च समर्पयामि सायुधाय
सवाहनाय सपरिवाराय ॐ भगवते गणेशाय नमः ।
इदं पुष्पं
दुर्वादलं धूपं दीपञ्च समर्पयामि सायुधाय सवाहनाय
सपरिवाराय ॐ भगवते गणेशाय नमः ।
इदं नैवेद्यं पुनराचमनीयं
जलं ताम्बूलं पूगिफलं दक्षिणाद्रव्यञ्च समर्पयामि सायुधाय
सवाहनाय सपरिवाराय ॐ भगवते गणेशाय नमः ।

एवं समस्तदेवपूजनं कार्यम्
ततो श्रधाञ्जलिः

ॐ देवेन्द्र मौलिमन्दारमकरन्दकणारुणाः ।
विघ्नं हरन्तु हेरम्ब चरणाम्बुजरेणवः ।

भगवान् गणेशः सम्पूजितः प्रसन्नो भवतु ।
इति प्रणमेत् ।
पुनः पुष्पं गृहीत्वा ।

ॐ रक्ताब्जयुग्मामयदानहस्तं केयूर हारांगद
कुण्डलाढ्यम् ।
माणिक्यमौलिं दिननाथमोढ्यं बन्धुककान्तिं

विलसत् त्रिनेत्रम् ।

इति ध्यात्वा

भगवान् सूर्यनारायण इहागच्छ इह तिष्ठ
मत्कृता पूजां गृहाण
इत्यावाह्य ।

पूर्वत्पूजूपकरणानि समर्प्य

ॐ नमस्सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयिमयाय त्रिगुणात्मधारिणे विरञ्चिनारायण शङ्करात्मने ॥

इति प्रणमेत्
पुनः पुष्पमादाय ।

ॐ शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभांगम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं वन्दे
विष्णुं भवभयहरं सर्वलोकैकनाथम् ।

इति ध्यात्वा

भगवन् विष्णो इहागच्छ इह तिष्ठ मत्कृतां पूजां गृहाण
इत्यावाहनादि पूर्ववत् ॐ विष्णवे नमः ॐ नारायणाय नमः ।

इति पूजोपकारणानि समर्प्य

ॐ कृष्णाय वासुदेवाय हरये परमात्मने
प्रणतक्लेशनाशाय गोविन्दाय नमोः नमः ।

इति प्रणमेत् ।

पुनः पुष्पमादय ।

ॐ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलांगं परशुमृगवराभितिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृति वसानं विश्वाद्यं
विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

इति ध्यात्वा

भगवन् महादेव इहागच्छ इह तिष्ठ मत्कृता पूजां गृहाण ।

इत्यावाह्य सम्पूज्य

ॐ बाणेश्वराय नरकार्णावतारनाय ज्ञानप्रदाय करुणामयसागराय ।
कर्पूरकुन्दधवलेन्दुजटाधराय दारिद्र्यदुःखदहनाय नमः शिवाय ॥

इति प्रणमेत्

पुनः पुष्पमादय

ॐ कालाभ्राभां काटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां शंखं चक्रं
कृपाणं त्रिशिखमपि करैरुद्वहन्तीं त्रिनेत्रां ।
सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीं ध्याये दुर्गां जयाख्यां
त्रिदशः परिवृतां सेवितां सिधिकामैः ।

इति ध्यात्वा

ॐ भगवति दुर्गे स्वगणसंयुते इहागच्छ इहा तिष्ठ मत्कृतां पूजां
गृहाण-इत्यावाह्य सायुधायै सवाहनायै सपरिवारायै ॐ भगवत्यै
दुर्गायै नमः ।

इति पुजोपकरणानि समर्प्य

ॐ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते।

इति प्रणमेत्

पुनः पुष्पमादाय

ॐ आकृष्णेन रजसावर्तमानो निवेशयन्नमृतं मर्त्यं च
हिरण्येन सविता रथेना देवो याति भुवनानि पश्यन् ।
ॐ भगवन्तः सुर्यादयो नवग्रहेन्द्रादिलोकपालाः ग्रामदेवताः
कुलदेवता सर्वदेव्यश्च इहागच्छत अत्र तिष्टत मत्कृतां पूजां गृहीत

इत्यावाह्य

इदं पाद्यं इदमर्घ्यम् ।

इदं स्नानीयमिदं पुनराचमनीयं जलं च समर्पयामि ।
इदं चन्दनं एतानक्षतांश्च समर्पयामि ।
एताणि पुष्पाणि विल्वपत्राणि धूपं
दीपं नैवेद्यं पुनराचमनीयं जलं च समर्पयामि ।
ॐ सूर्यादि नवग्रहेभ्यो नमः ।
ॐ इन्द्रादि लोकपालेभ्यो नमः ।
ॐ ग्रामदेवेभ्यो नमः ।
ॐ कुलदेवेभ्यो नमः ।
ॐ इष्टदेवेभ्यो नमः ।
सर्वेभ्योः देवेभ्यस्तथा च सर्वाभ्यो देवेभ्यो नमोः नमः -

इति पूजोपकरणानि समर्प्य

ॐ सर्वे देवास्सर्वा देव्यश्च पूजिताः प्रसन्न भवत ।

शिवस्य गणपतेर्विष्णोर्सूर्यस्य दुर्गाया वा प्रधानदेवतायाः पूर्वोक्त-ध्यानवाक्येन
ध्यानं धृत्वा पूर्वत् आवाह्य पूजोपकरणानि समर्प्य ।
ॐ कर्पूरवर्तिसंयुक्तं गोघृतेन च पूरितम् ।
नीराजनं मया दत्तं गृहाण परमेश्वर ॥

इति नीराजनं निवेद्य

ॐ अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् ।
विपरीतञ्च तत्सर्वं क्षमस्व परमेश्वर ॥

आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजाञ्चैव न जानामि क्षम्यतां परमेश्वर ॥

ॐ अपराधसहस्राणि क्रियन्ते ऽहर्निशं मया ।
दासोऽयमिति मां ज्ञात्वा क्षमस्व जगदीश्वर ॥

इत्यपराधमार्जनं त्रिपुष्पाञ्जलिर्निवेद्य शंखघण्टावादनैर्देवादिकं स्तुत्वा प्रणम्य।

ॐ यान्तु देवगणास्सर्वे पूजामादाय मामकीम् ।
पूजाराधनकालेषु पुनरागमनाय च ॥

ॐ गच्छ गच्छ परं स्थानं स्वं धाम परमेश्वर ।
आवाहनस्य समये यथा स्यात्पुनरागमः ॥

इति संहार मुद्रया विसर्जनं कृत्वा ।

ॐ कृतैतदमुकदेवतापूजनकर्मणः साङ्गतासिद्ध्यर्थं ब्राह्मणाय दक्षिणां सम्प्रददे ।
इति पञ्चदेवता पूजा पद्धति ।

Encoded by Daniel Mohanpersad danielmohanpersad98@msn.com

.. Worship of Five Deities ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*